यस्य अस्ति वित्तं स नरः कुलीनः, स पण्डितः, स श्रुतवान्गुणज्ञः, सः एव वत्का, सः च दर्शनीयः, सर्वे गुणाः काञ्चनम् आश्रयन्ते, यस्य, यस्य नरस्य, अस्ति भवति, वित्तं, धनं, स नरः कुलीनः, कुलीनः इति उक्ते उच्चवंशीयः. यस्य नरस्य वित्तम् अस्ति, धनम् अस्ति, सः नरः उच्चवंशीयः इति जनाः मन्यन्ते. तस्य जन्म उच्चवंशे भवति इति जनाः मन्यन्ते. यस्य जनस्य बहुधनं भवति, यः नरः, यः जनः धनी भवति, धनिकः भवति, सः कुलीनः भवति इति जनाः मन्यन्ते. कुलीनः इति उक्ते उच्चवंशीयः इति. सः पण्डितः भवति. यस्य जनस्य बहुधनं भवति तं जनाः पण्डितं कथयन्ति. सः पण्डितः इति जनाः मन्यन्ते, चिन्तयन्ति. सः श्रुतवान्, श्रुतवान्, श्रुति-युक्तः, शास्त्र-ज्ञः इति अर्थः. सः पण्डितः इति अर्थः सः विद्वान् इति अर्थः. सः श्रुतवान् अर्थात् यस्य नरस्य वित्तं भवति बहुधनं भवति सः श्रुतवान् भवति इति जनाः चिन्तयन्ति. सः पण्डितः इति जनाः चिन्तयन्ति. सः विद्वान् इति जनाः मन्यन्ते. सः गुणज्ञः इति जनाः चिन्तयन्ति. गुणज्ञः, गुणी. तस्य बहुगुणाः भवन्ति इति सः गुणी जनः भवति इति जनाः मन्यन्ते. सः एव वक्ता. वक्ता-वक्ति इति वक्ता. वदति इति वक्ता. अर्थात् सः सुवक्ता उत्तमवक्ता, सः सुष्ठु भाषते.। सुष्ठु वक्ति सम्यग् भाषते, सम्यक् कथयति. सम्यक् वक्ति इति जनाः चिन्तयन्ति, जनाः मन्यन्ते. स च दर्शनीयः, दर्शनीयः इति उक्ते सुन्दरः. सोऽपि सुन्दरः भवति. यस्य बहु-धनं भवति सोऽपि सुन्दरः भवति. सः असुन्दरोऽपि जनाः तं सुन्दरम् इति चिन्तयन्ति इति कथयन्ति. किमर्थम्? यतः सर्वे गुणाः काञ्चनम् आश्रयन्ते. सर्वे गुणाः काञ्चनम्, सुवर्णम् आश्रयन्ते सुवर्णम् अधितिष्ठन्ति. सुवर्णम् आश्रित्य तिष्ठन्ति इति जनानां भावना. अर्थात् यस्य नरस्य बहुधनं भवति सः उच्चवंशीयः इति जनाः चिन्तयन्ति, सः पण्डितः इति चिन्तयन्ति, सः शास्त्रज्ञः, विद्वान् इति चिन्तयन्ति, गुणज्ञः इति चिन्तयन्ति, सः एव उत्तमः वक्ता इति कथयन्ति, सः सुन्दरः इति कथयन्ति, अतः सर्वे गुणाः काञ्चनम् आश्रयन्ते, सर्वे गुणाः धनम् आश्रयन्ते, धनम् आश्रित्य एव वर्तन्ते, भवन्ति इति जनानां चिन्तनं, जनानां धारणा, जनानां भावना इति सुभाषितं वदति.